श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षट्चत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षट्चत्वारिंशं दशकम् ॥

## विश्वरूपप्रदर्शनवर्णनम्

अयि देव पुरा किल त्वयि
स्वयमुत्तानशये स्तनन्धये।
परिजृम्भणतो व्यपावृते
वदने विश्वमचष्ट वल्लवी ॥ 46.1 ॥

पुनरप्यथ बालकैः समं
त्वयि लीलानिरते जगत्पते।
फलसञ्चयवञ्चनक्रुधा
तव मृद्भोजनमूचुरर्भकाः ॥ 46.2 ॥

अयि ते प्रलयावधौ विभो
क्षितितोयादिसमस्तभक्षिणः।
मृदुपाशनतो रुजा भवे -
दिति भीता जननी चुकोप सा ॥ 46.3 ॥

अयि दुर्विनयात्मक त्वया
किमु मृत्सा बत वत्स भक्षिता।
इति मातृगिरं चिरं विभो
वितथां त्वं प्रतिजज्ञिषे हसन् ॥ 46.4 ॥

अयि ते सकलैर्विनिश्चिते
विमतिश्चेद्वदनं विदार्यताम्।

इति मातृविभर्त्सितो मुखं
विकसत्पद्मनिभं व्यदारयः ॥ 46.5 ॥

अपि मृल्लवदर्शनोत्सुकां
जननीं तां बहु तर्पयन्निव।
पृथिवीं निखिलां न केवलं
भुवनान्यप्यखिलान्यदीदृशः ॥ 46.6 ॥

कुहचिद्वनमम्बुधिः क्वचित्
क्वचिदभ्रं कुहचिद्रसातलम्।
मनुजा दनुजाः क्वचित् सुरा
ददृशे किं न तदा त्वदानने ॥ 46.7 ॥

कलशाम्बुधिशायिनं पुनः
परवैकुण्ठपदाधिवासिनम्।
स्वपुरश्च निजार्भकात्मकं
कतिधा त्वां न ददर्श सा मुखे ॥ 46.8 ॥

विकसद्भुवने मुखोदरे
ननु भूयोऽपि तथाविधाननः।
अनया स्फुटमीक्षितो भवा -
ननवस्थां जगतां बतातनोत् ॥ 46.9 ॥

धृततत्त्वधियं तदा क्षणं
जननीं तां प्रणयेन मोहयन्।
स्तनमम्ब दिशेत्युपासजन्
भगवन्नद्भुतबाल पाहि माम् ॥ 46.10 ॥

॥ इति श्रीमन्नारायणीये षड्चत्वारिंशं दशकं समाप्तम् ॥